# Shri Krishna Stotram

# શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Krishnastotram by Umeshvarananda

File name : kRRiShNastotramumeshvarAnanda.itx

Category : vishhnu, krishna, stotra

Location : doc_vishhnu

Author : Swami Umeshvaranand Tirth

Proofread by : Paresh Panditrao

Description/comments : Ganga Mahatmya And Stuti Ratnavali By Swami Umeshvaranand Tirth

Latest update : July 8, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તોત્રમ્

દિવ્યાતિદિવ્યં પરમઞ્ચસુન્દરં
    શ્યામાઙ્ગ શોભા સુવિકાશમુજ્જ્વલમ્ ।
કેયૂરવાન્ કુણ્ડલવાન્ કિરીટિવાન્
    પીતામ્બરં વંશીધરં હરિં ભજે ॥ ૧॥

ચન્દ્રાનનં શોભિતમમ્બુજેક્ષણં
    શ્રીવત્સવક્ષસ્થલ માલિકાદિભિઃ ।
વિભૂષિતં મેખલયાઙ્ગુલીયકૈ-
    ર્વૃન્દાવને વંશીધરં હરિં ભજે ॥ ૨॥

આનન્દદં શાન્તિપ્રદં સુવિગ્રહં
    આનન્દકન્દં સરસિરુહેક્ષણમ્ ।
સુમઙ્ગલં વાઞ્છિતદં સનાતનં
    નમામિ કૃષ્ણં પરમં સુદુર્લભમ્ ॥ ૩॥

મધ્યે નિકુઞ્જ મધ્યેવનકાન્તિ શોભિતં
    ગોપાઙ્ગનાનાં પરમં સુસૌખ્યદમ્ ।
સમાહ્વયન્તં નિકેટસ્થિતાઞ્જનાન્
    સદા પ્રસન્નં પ્રણમામિતંહરિમ્ ॥ ૪॥

મધુરં મધુરં નાદં વંશીવાદન કારકમ્ ।
સમાહ્વયન્તં ગોપીનાં તં નમામિકૃપાનિધિમ્ ॥ ૫॥

નિકુઞ્જમધ્યેગુપ્તં ચ રાધયા સહ સંયુતમ્ ।
રમણીયં સુરપતિં કૃષ્ણં વન્દે દયાનિધિમ્ ॥ ૬॥

ગોપીનાં સુમુખીનાઞ્ચ રાસહાસ સમાગમઃ ।
પરમાનન્દ દાતારં નમામિ શ્રીહરિમ્પરમ્ ॥ ૭॥

સુમુખેમુરલીધૃત્વા વાદયન્ પૂરયન રસાન્ ।

ત્રૈલોક્યાનન્દદન્દેવં કૃષ્ણં વન્દે સતાઙ્ગતિમ્ ॥ ૮॥

સમાકર્ષયન્તં સુધાવર્ષયન્તં
    સમાસ્વાદયન્તમનુરાગિણીનામ્ ।
સદાનન્દકારિં સુમાલીં મુરારીં
    સદાલમ્બયેહં તવૈવ સકાશમ્ ॥ ૯॥

શ્રીકૃષ્ણકૃષ્ણભગવન્ મમ દીનબન્ધો
    ત્રૈલોક્યરક્ષક વિમોકરુણાનિધાનઃ ।
સંસારભીતિદહન સુખરૂપધારિન્
    વન્દે સદૈવ ચરણૌ તવ શાન્તિદાયકૈ ॥ ૧૦॥

શ્રીકૃષ્ણકૃષ્ણેતિક્ષરદ્વયં પ્રિયં
    શાન્તિપ્રદં નામ સુમઙ્ગલઞ્ચતે ।
વાક્ગદ્ગદઞ્ચિત્તદ્રવં ચ યેષાં
    તેયાન્તિ સદ્યમ્ભવસિન્ધુ પારમ્ ॥ ૧૧॥

શ્રીકૃષ્ણ નામં પરમં સુદુર્લભં
    યે યે જપાન્તીહ સદૈવમર્ત્યાઃ ।
તેધન્યભાગ્યાસુકૃતાકૃતાર્થાઃ
    તરન્તિપારમ્ભવસાગરસ્ય ॥ ૧૨॥

ઇતિ શ્રી સ્વામી ઉમેશ્વરાનન્દતીર્થવિરચિતં શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Paresh Panditrao

*Shri Krishna Stotram*

pdf was typeset on July 8, 2023

Please send corrections to *sanskrit@cheerful.com*